॥ श्रीः ॥
॥ नमो राघवाय ॥
॥ श्रीमद्राघवो विजयते ॥ श्रीसीतारामौ विजयेते ॥

# ॥ लघुरघुवरम् ॥

## (संस्कृतखण्डकाव्यम्)

## (प्रणेतारः – जगद्गुरुरामानन्दाचार्यस्वामिरामभद्राचार्यमहाराजाः )

© 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.

जयति जगति लघुरघुवरहरिरति
दिशति भजत इह सुखमधिकरिरति ।
सुरसरिदिव यदनुचरितमलयति
निखिलभुवनमथ पतितममलयति ॥ १ ॥
अभिनवजलधरजलदरुचिररुचि
कलवलवचनशिशिरकररससिचि ।
दशरथसुवि मम सुमन इभविमुचि
सुखमभिरमतु भवति भगवति शुचि ॥ २ ॥
निजपदविनतविगुणमपि गुणयति
शिशुसुमशरशतरुचिमवगणयति ।
सुजनसुमनसि वसतिमधिकलयति
भवतु भवति रतिरमलममलयति ॥ ३ ॥
निरवधिनिरुपमशुभगुणसुखवति
लघुलघुधनुरिषुसदनविशिखवति ।
अगजगदवति भवति मृगखगवति
भवति भवतु मम मतिरथ भगवति ॥ ४ ॥
मतिमति मुनिमति युवतिसुरतिमति
चरणनलिननतसुदमितगतिमति ।
भवभयशमनसुकृतिमति धृतिमति
मतिरतिलषतु चरणरतहनुमति ॥ ५ ॥
दशरथसुकृतविबुधतरुफलपुषि
जननिहृदिजविगलदमलरसजुषि ।
वनजवनदवनधिवरदसुवपुषि
दृगभिरमतु मम मनसिजमदमुषि ॥ ६ ॥

जय दिनकरकुलवनरुहदिनकर
जय तनुरुचिजितशिखिगलजलधर ।
जय हरहृदुदजमधुकर मलहर
जय दशरथसुत शिशुलघुरघुवर ॥ ७ ॥
जय रविकुलशुभसुकृतसुतरुफल
जय गतबलबल सरल विपुलबल ।
जय निजभुजबलदमितदनुजदल
जय वरचरितमहितहितमहितल ॥ ८ ॥
जय जय जनितजलजपतिकुलसुख
जय जय शरदुडुपतिरुचिजितमुख ।
जय जय समवितकुशकतनयमख
जय मुनिगृहिणिदुरितहर शिवसख ॥ ९ ॥
जय जय मिथनृपनगरसुकृतकर
जय जय शकलितशिवधनुरघहर ।
जय जय जडितपरशुधर नरवर
जय जय जनकदुहितृवर रघुवर ॥ १० ॥
जय सुरनरमुनिसकलसुखनिलय
जय जय विहितभृगुतिलकमदलय ।
जय जय सुखितधरणिसुरकुवलय
जय जय विहितजलधिवरसुवलय ॥ ११ ॥
मुनिवरगृहिणिदुरितहर जय जय
हरधनुरहिखगकुलवर जय जय ।
कुतुकदलितभृगुमदभर जय जय
धरणिदुहितृवर सुखकर जय जय ॥ १२ ॥
जय जय नरवर तपनकुलतिलक
जय जय निटिललसितललिततिलक ।
जय जय समकलकलितसमकलक
जय धृतहृदिधरणिसुरपदफलक ॥ १३ ॥
द्रव मयि मलवति मनुजकुलभरण
मनुकुलकुमुदसुखदशिशिरकिरण ।
निजरतविनतविरतदुरितहरण
सुरनरमुनिनतनवनलिनचरण ॥ १४ ॥
भव मयि सकरुण इमथन हृदयन
धरणिजननिमुखजलजमधुचयन ।

© 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.

प्रणतहृदयवरसदनशुभशयन
समशुभगुणगृहकलकमलनयन ॥ १५ ॥
कुरु सकरुणदृशमिभमथनमहित
मगधदुहितृसुतहृदजिरविनिहित ।
अशरणशरण भयहरण जनहित
त्रिभुवनजननिरमणिगृहिणिसहित ॥ १६ ॥
जगदिदमखिलमवनधनसमवसि
जगदिदमखिलमवनधनसमवसि ।
जगदिदमखिलमवनधनसमवसि
जगदिदमखिलमवनधनसमवसि ॥ १७ ॥
अवधनगरमभिसगरमवतरसि
दिशि दिशि विमलविरुदमथ वितरसि ।
तरयसि सतदुह सततमनुतरसि
पयसिजदलमिव भवपयसि तरसि ॥ १८ ॥
हरिरिह निजजनदुरितमपहरसि
कुशलमनुजमणिचरितमनुहरसि ।
कुटिलमनस इभमहित परिहरसि
गतमलहृदजिर इकदन विहरसि ॥ १९ ॥
प्रणतहृदयवरवनमभि विचरसि
गतमलनयनसुमनसमनुचरसि ।
अघहरविशदितचरित परिचरसि
सममिह जगति सुगदित गुणचरसि ॥ २० ॥
प्रभुरथ जगदधतिमिरमभिभवसि
जगदुदयलयभवविधिसु विभवसि ।
अशरणशरण समरणमनुभवसि
रविकुलरविरथ विमलदृशि भवसि ॥ २१ ॥
सुरसदवनिसुरविपदमपहरसि
रतिमथ पदरतमनस उपहरसि ।
सुरनरमुनिगणनयनमपि हरसि
शिशुदिनकर इव तिमिरमिह हरसि ॥ २२ ॥
करसरसिज इषुधनुरधि कलयसि
पविरिव भवगिरिमकल सकलयसि ।
निजहृदि जगदगमघहर कलयसि
विमुखनिकरमिह विकल विकलयसि ॥ २३ ॥

© 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.

विषमविषमशररुजमपि शमयसि
मनुज दनुजदलदरमभि दमयसि ।
रिपुमपि सुतमिव निजसुपदमयसि
विनतविपदमपि विपद विरमयसि ॥ २४ ॥
भवभयमपि मम धृतशर गमयसि
मुनिजनहृदपि यमितयम यमयसि ।
सुरपतिमपि नरपतिवर नमयसि
चरणशरणमथ निजपदि रमयसि ॥ २५ ॥
जनहृदिसदन मदनमथ परिभव
भवदवदहनविषयदवमभिभव ।
रघुकुलतिलक विनतनिजजनमव
सकरुण दृगमल मयि विलपति भव ॥ २६ ॥
निजशुभसदनदहलमिम जहि जहि
मलवति बलवति करुणय नहि नहि ।
जनसुखसुकृतहरणमज न जहिहि
किमु न सुकरमिह भवति सुभुजदहि ॥ २७ ॥
प्रकृतिमृदुलनिजगुणमिह परिहर
सत इभसुखद विशदसुखमुपहर ।
मम हृदजिर इरिपुशरणद विहर
हरसुखकर हरमुखशरमपहर ॥ २८ ॥
दिनमणिकुलमण इदमथ मम शृणु
वचनमरचन पतितजनमभिवृणु ।
हृदयनिहितमघकुधरमदरमृणु
शिरसि शिरिषसरसिजकरमपि कृणु ॥ २९ ॥
रुचिजितजलजजलद दशरथसुत
सुशिखविशिखमखखलकुलघृतहुत ।
हर मम विषममभय सुरनरनुत
निवस मनसि मम धरणिदुहितृयुत ॥ ३० ॥
अयि गुणजलनिधि इरिपुनयनखर-
दहनशमनघन नववनधरवर ।
करुणय मयि पदलसितगिरिशिखर
शृणु शृणु मम गिरमभिमत गिरिधर ॥ ३१ ॥
मम परिरमतु निखिलजगदवितरि
मन इदमतित सशिखिशशिसवितरि ।

© 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.

सवितरि भवितरि भवति भवपितरि
हृदयनिहितहितवसुमतिदुहितरि ॥ ३२ ॥
विरमतु जगत इतररतिमतिरथ
मयि करुणय करुणितदृगनघकथ ।
हर इह वितथय कलियुगमवितथ
गणय न मम कलुषकुधरमतिरथ ॥ ३३ ॥
इषुमति कुमतिकदनकृति शुभवति
कृतिमति मतिमति गतिमति विभवति ।
प्रभवति भवति समखिलजगदवति
विलसतु मम मति अगवति भगवति ॥ ३४ ॥
अयि खरहर हरहृदुदजमधुकर
करिकरकर दिनकरकुलदिनकर ।
दशरथसुत जनकुमुदतुहिनकर
विहर मनसि मम नमुचिकदनकर ॥ ३५ ॥
जनकदुहितृहृदयसदन जय जय
तनुरुचिविजितशतमदन जय जय ।
समरविनिहतदशवदन जय जय
भुजबलविपुलखलकदन जय जय ॥ ३६ ॥
वपुरभिजितनवनवघन जय जय
चरणनिरतरतिरतजन जय जय ।
चरितमहितहितमुनिवन जय जय
दुरितदमन निजजनधन जय जय ॥ ३७ ॥
दशरथसुकृतसरससुरतरुफल
भुजजलनिधिविलसितरणरसजल ।
समरमहितमखनिहुतविपुलखल
मयि करुणय करुणितदशमुखबल ॥ ३८ ॥
भवति भवति भवभववति विभवति
निखिलजगदवति सुखदनिगदवति ।
तव परिजनमिह निशितविशिखवति
कथय कथमु कलिरनघ परिभवति ॥ ३९ ॥
त्वयि सति सदमितदुरितदमितवति
दशमुखमथ खलशमन शमितवति ।
शतशतरतिपतिरुचिमपि जितवति
किमभिभवति कलिरिममिभमितवति ॥ ४० ॥

© 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.

http://www.jagadgururambhadracharya.org

अवधनगरमुपसरमुपरिलषति
समधिधनददिशमनुकमभिलषति ।
रघुकुलनृपतिमहितमति विलसति
दिवमिह विगणितरुचमिव विहसति ॥ ४१ ॥
विधिसुतदुहितृपुलिनमुपकलयति
पदमिभपदपदमकलमकलयति ।
नगरमगरमज कमिह विकलयति
सुरपुरमघवनमपि विशकलयति ॥ ४२ ॥
तदधिवसति तपनकुलममलमति
सततमधि हृदयमहितभुवनपति ।
श्रुतिपथनिरतनृपति विशदितकृति
निजयश उडुपति धवलति वसुमति ॥ ४३ ॥
प्रथममहह दिनकरसुतमलभत
मनुमथ कुलमिदमृषिगुणमरभत ।
कलितविपुलधनहयगजरथमत
इरिपुमहिततपदरजसि समरमत ॥ ४४ ॥
यदवनिभृदमरगणविषमविपदि
दनुजदलितगुरुसुरवरपरिषदि ।
व्यलसदनिमिषपवृषभकलककुदि
समितिविहितरिपुतनुजरुधिविनदि ॥ ४५ ॥
यदतुलनरपतिसुतप उदितमिव
हरिमयमथ शिवशिरसि निचितमिव ।
निखिलजगदमलसुतनुसुकृतमिव
धरणिमभिलषति निभृतममृतमिव ॥ ४६ ॥
यदहह धृतहरिविधुनरपतिजनु-
रभिमृदितविजयसुखशतदलदनु ।
खलमदमथनविरुदधृगसनिधनु-
रमरपमपि हसति गुणमृडितमनु ॥ ४७ ॥
यदनिशमभिमहितजगदवनजनि
निजधनविमदविहितसुरपुरधनि ।
चरितसुरभिसुरभितजनमतिवनि
विभवति सुरपुरमपि विलसदवनि ॥ ४८ ॥
यदनघमधिमघमरिभिरजितमपि
सदजितमभिजिदवति शुभकृतमपि ।

© 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.

गिरभिगदितचितचरितचरितमपि
न भवति मदि मदिकरिमुखरितमपि ॥ ४९ ॥
वनजनिजनिमृदुमति विलसितमिव
मणिमयभवनिसुखनिपरिभृतमिव ।
सकलजगदमलसुखदसुकृतमिव
कुलमिह लसति तपनसुचरितमिव ॥ ५० ॥
क्वचिदपि यदनलगुरुषु न हि भवति
सकदवममतमपि विभवमनु भवति ।
सुरभिसुरभिपदरज इह विभवति
कुमपि सुगुणमणिनिकरमभिभवति ॥ ५१ ॥
तदमलकुरुत विमलमथ रघुरति
विधुरनुपमगुणविमदितजलपति ।
रघुपतिचरणकमलसरसितमति
हरिपदरतिरसविगणितशुभगति ॥ ५२ ॥
महसि विकलयति दृगजनरविमपि
यशसि विमदयति वधुगुरुकविमपि ।
सहसि विफलयति किल धृतपविमपि
वपुषि विगणयति रतिजगदविमपि ॥ ५३ ॥
यदमलविभवविजितशतदिनकृति
समुदयति दिनकृदपि भवभयहति ।
निजकुलविरुदमदिषदघपरिहृति
रघुकुलमिति गुणलसति धरणिभृति ॥ ५४ ॥
भुवनजिदभिधकसु सुमखमखयत
रघुरधिविजयमदितिजमसखयत ।
विजितनृपतिजगदखिलमसुखयत
हरिपदमपि भुवमभि सममुखयत ॥ ५५ ॥
रघुरजमपि दयिततनयमलभत
नहि महिसुरगुरुशिशुषु समरभत ।
श्रुतिनिगदितमनुगतपथमरभत
तदनु विरजवपुरमपि समलभत ॥ ५६ ॥
अज इरिपुमहितजनकमजनयत
दशरथमजशुचितनयमतनयत ।
शरहुतभुजि रिपुवनमदहनयत
सुरपुरसुखमभिमहितलमनयत ॥ ५७ ॥

© 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.

नरपतिरपि निजरिपुकरमजयत
दिशि दिशि युधि खरशरकरमसृजत ।
श्रुतिपथरत इह शुभमखमयजत
सततमजनपदसरसिजमभजत ॥ ५८ ॥
अथ रविमदमिधनरपतिदुहितरि
हरिरिव हरति कलितजगदवितरि ।
प्रकटिततनुरभवदवति सवितरि
हरिरधिकुमुदितसविधुबुधपितरि ॥ ५९ ॥
अधिमधुसितकुजनवमि भुवनपति-
रमितसततधृतनलिनचरणरति ।
धृतधनुरिषुसुखकलितविमलमति-
रखिलजगदवनविभुरधि वसुमति ॥ ६० ॥
भजनसरसि भवनवकुवलयमिव
महसि निचितसुरपतिमणिमयमिव ।
दिनकरकुलशुचिसुकृतिनिचयमिव
जननि अभजदजितमज हृदयमिव ॥ ६१ ॥
धृततनु दशरथसुमखसुकृतमिव
समपचितिनलिनमसितमभृतमिव ।
रघुकुलविभवमनघमुपहृतमिव
कृतवपुरहह सकलशुभकृतमिव ॥ ६२ ॥
भजनरसिकजनविमलनयनमिव
विनतनिकरजलकलखगघनमिव ।
सरसपरमसुखविशदितधनमिव
दशमुखकुलखलविपिनदहनमिव ॥ ६३ ॥
धरणिदुहितृशुचिसुकृतसुफलमिव
निखिलभजकजनविपुलितबलमिव ।
अनघसकलशुभगुणशुचिकुलमिव
रसिकनयनघनमहनसुजलमिव ॥ ६४ ॥
तमलमकृत वरवसनवसितमपि
जननि अखिलगुणगणविलसितमपि ।
लघुरघुवरमजसुतजहसितमपि
मुखरुचिभिरमरभरणलसितमपि ॥ ६५ ॥
भरतफणिपरिपुदमनकलितमह
महिजविभवकरचरणललितमिह ।

© 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.
http://www.jagadgururambhadracharya.org

हरिमभजत परिजनदृगशुभदह-
मभितृषमनिमिषदृशपितृभिरह ॥ ६६ ॥
अनयदहह तमशयननयनभुवि
लघुलघुचरणचलितमचलितकवि ।
दशरथ उदितविमलरविकुलरवि
ममज मनुजयुतमनुपममधिगवि ॥ ६७ ॥
श्रुतिशिरउदितमहितमुनिसुखमिव
मलयमरुदवितसुदिवसमुखमिव ।
धृतनृपशिशुतनुमृदुमधुसखमिव
निजगुणविगणितशतशतमखमिव ॥ ६८ ॥
वदनत इसखविभवमपि स हरति
चिकुरनिकररुचिभिरलिमनुसरति ।
चरणनलिनरतसमलमपहरति
दशरथविलसदजिर इह विहरति ॥ ६९ ॥
कचनचपलकरचरणमपि चरति
निजप्रतिकृतिमपि इहसि परिचरति ।
जननिकरजरवमुदितमनुचरति
महिभृदजिरभुवि हरिरिह विचरति ॥ ७० ॥
कृचिदरमत सह शिशुभिरभिरजसि
सततमिव भजनरसिकजनमनसि ।
चलति विमदयति कलिततृणधनुषि
सधनुरमलजलमुगपिमनुजनुषि ॥ ७१ ॥
कुचिदथ किलकति चपलमतिचलति
लुठति जननि भवपयसि भुवि ललति ।
दिशि दिशि विकिरति पटमथ विचलति
धयितुमहह समनुनयति विकलति ॥ ७२ ॥
हरिरजिरमभि नटटि ननु विहसति
दशरथमन उदजकमिव विकसति ।
जननिहृदयनिधिरधिहरि विलसति
धृतशिशुतनुरघहरण इह लसति ॥ ७३ ॥
प्रभुमुखममृतसदनमभि विभवति
कलभमहह भुजयुगलमभिभवति ।
कुसुमविशिखमनु सुतनु किल भवति
पदयुगमज पितरमपि परिभवति ॥ ७४ ॥

© 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.

विधुमुखविलसितसमलकमलयति
नयनयुगलमपि नवलकमलयति ।
तिलककलितनिटिलकमभिकलयति
वनधरवपुरिह विभुरवकलयति ॥ ७५ ॥
लघुलघुकरपदचर इह विलसति
कलबलवचनकलितमति विहसति ।
मुखरुचिशिशिरकिरणमपि विरसति
अवधसरसि सरसिजमिव विकसति ॥ ७६ ॥
भवनिधिविषमविपदभवगणयति
जनभयविपिनविषमपि विगणयति ।
निखिलनिगमगुणगणमपि गणयति
विनतविहितकुकृतमपि न गणयति ॥ ७७ ॥
जननिजनकपरिजनमपि रमयति
जगदघनिकरमहह स विरमयति ।
खलकुलबलमपि सपदि नियमयति
हरिरथ निजजनयममपि यमयति ॥ ७८ ॥
क्वचन चटकचलककमपि स धरति
विहरति हरिरिह मनसिजमधरति ।
शिशुरविपटधर इभयमपि दरति
प्रभुरथ विषमविपदमपि विदरति ॥ ७९ ॥
कृतकररवमभि नटति परिशुकति
कलबलमतिमृदु वदति किल पिकति ।
विचरति विहसति विभुरति किलकति
सुखयति पितरमखिलमपि तिलकति ॥ ८० ॥
धनुरिषुरिषुधिमधिकटि किल धरसि
निजपदसरसिजभजकमनुसरसि ।
निजयशउडुपतिरसमिह वितरसि
गिरिधरहृदि लघुरघुवर विहरसि ॥ ८१ ॥
मदनमथव भवनिशिचरकुलदव
परमसुभगभग हतदशमुखजव ।
हर मम दुरितमिह मुदित मयि भव
कुटिलकलित इममथ गिरिधरमव ॥ ८२ ॥
दशरथसुकृतसुतरुफल जय जय
अशरणशरण गलितमल जय जय ।

© 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.

शितशरनिहतकुटिलखल जय जय
लघुरघुवर गिरिधरबल जय जय ॥ ८३ ॥
इति निजरतिहतिमलमतिमपहर
अपगिरिभणितमनघमिदमनुहर ।
लघुरघुवरमव नृपतितनयवर
गिरिधर मनसि विहर लघुरघुवर ॥ ८४ ॥

॥ श्रीराघवः शन्तनोतु ॥

© 2011 Shri Tulsi Peeth Seva Nyas. All Rights Reserved.